योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः १२१

अज्ञातलेखकः

एकविंशत्यधिकशततमः सर्गः १२१

श्रीवसिष्ठ उवाच ।

अथ तेष्वर्णवतटेष्वेते भूमौ विपश्चितः ।

उपविश्यैतदखिलं चक्रू राज्यप्रयोजनम् ।। १

तदा तत्रैव ते वासभूमिं कृत्वा यथाक्रमम् ।

तस्थुर्मण्डलमर्यादां स्थापयामासुरक्षताम् ।। २

अथ वर्णयितुं श्रीमांस्तत्प्रतापमिवागमत् ।

संप्रविश्य समुद्रान्तरन्यलोकान्तरं रविः ।। ३

आययौ यामिनीश्यामा मेघलेखेव तानवम् ।

संपादिताहर्व्यापारास्तस्थुः स्वशयनेषु ते ।। ४

आसमुद्रं नदीवाहा इव दूरादुपागताः ।

इदं संपादयामासुर्विस्मयाकुलचेतसः ।। ५

अहो नु दूरमध्वानं प्राप्ता वयमयत्नतः ।

प्रभावाद्देवदेवस्य वह्नेर्दिव्यैः स्ववाहनैः ।। ६

कियती स्यात्प्रविस्तीर्णा दृश्यश्रीरियमातता ।

इतः समुद्रस्तदनु द्वीपभूरम्बुधिः प्रभुः ।। ७

इतो द्वीपं ततोऽम्भोधिः किमन्ते स्यात्ततोऽपि च ।

कियती कीदृशी वा स्यान्मायेयं चेत्यरूपिणी ।। ८

तत्प्रार्थयामहे देवं हुताशं तद्बरादिमाः ।

प्रेक्षामहे दिशः सर्वा आपर्यन्तमखेदिनः ।। ९

इति संचिन्त्य ते सर्वे यथास्थानमवस्थिताः ।

सममेवाह्वयामासुर्भगवन्तं हुताशनम् ।। १०

बभूव भगवानेषामथ दृश्यो हुताशनः ।

आकारवान्वरं पुत्राः प्रगृह्णीतेत्युवाच ह ।। ११

विपश्चित ऊचुः ।

पञ्चभूतात्मकस्यास्य दृश्यस्यान्तं सुरेश्वर ।

देहेन मन्त्रदेहेन तदन्ते मनसापि च ।। १२

यावत्संवेदनं यावत्संभवं यावदात्मकम् ।

पश्येम इति नो देव दीयतामुत्तमो वरः ।। १३

आसिद्धगम्यमध्वानं पश्येम वपुषा वयम् ।

तदन्ते मनसैवाथ दृश्यं पश्येम भो प्रभो ।। १४

आसिद्धगम्यमध्वानं मृत्युरस्माकमस्तु मा ।

अध्वन्यसंभवद्देहे मन एव प्रयातु नः ।। १५

श्रीवसिष्ठ उवाच ।

अथैवमस्त्विति प्रोच्य पावकः सहसागमत् ।

क्षणादौर्वतया यातुं समुद्र इव सत्वरः ।। १६

अग्निर्जगामाथ समाजगाम

निशा विलम्ब्याथ जगाम सापि ।

समाजगामापि रविर्जगाम

तेषां च धीरार्णवलङ्घनेहा ।। १७

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मी० दे० मो० नि० उ० अवि० विप० विपश्चिन्निर्णयो नामैकविंशत्यधिकशततमः सर्गः ।। १२१ ।।